International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(6): 65-66
© 2020 IJSR
www.anantaajournal.com
Received: 02-09-2020
Accepted: 08-10-2020

**निहारिका**
पीएच–डी, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

**Corresponding Author:**
**निहारिका**
पीएच–डी, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

# सम्प्रज्ञातासम्प्रज्ञातयोगविध्योः विवेचनम्

## निहारिका

**सारांश**
दर्शनशास्त्रे योगदर्शनस्य महनीय–महत्त्वं वर्त्तते। एतदर्थं नास्तिकदार्शनिकाः भवन्तु वा आस्तिकदार्शनिकाः सर्वे भिन्न–भिन्न रूपेण अस्य साधनायां प्रवृत्ताः भवन्ति। भारतीय वाङ्गमयानुसारं सृष्टेः आरम्भकाले सर्वप्रथमं योगसिद्धैः ऋषिभिः ध्यानावस्थायां वैदिक–मन्त्रणां दर्शनम् अभवत्। वेद–वेदाङ्ग–साहित्येऽपि योगस्य अनेकसन्दर्भाः प्राप्यन्ते।

**मुख्य शब्दः** सम्प्रज्ञातः, असम्प्रज्ञातः, वितर्कः विचारः, आनन्दः, अस्मिता, उपाय प्रत्ययः भवप्रत्ययः

**प्रस्तावना**

योगदर्शनस्य परम्परा – स्थूलतया योगः द्विविधः स्वीक्रियते। तत्र प्रथमस्तु सम्प्रज्ञातः द्वितीयस्तु असम्प्रज्ञातः। यथा दर्पणे मुखकृतिः सम्यक् स्यात् इति एष्यते चेत् दर्पणस्य स्वच्छता नितराम् अपेक्षते तद्वदेव सूक्ष्मपदार्थस्य यथार्थज्ञानाय निर्मलचित्तम् अनिवार्यम्। ष्चित्तस्य स्वतः एव सर्वार्थसाक्षात्कारसामर्थ्यमस्ति विषयान्तरव्याससङ्गदोषादेव त तत्प्रतिबदमतो वृत्त्यन्तरप्रतिबन्धस्य निःशेषतो निगमे स्वत एव ध्येयवस्तुसाक्षात्कारस्तद्रपापत्याख्यो भवति।

एकाग्रताकाले राजस–तामसवृत्ती निरुद्धे भवतः एतस्मात् कारणात् चित्तम् निर्मलं जायते। सत्त्वगुणप्रधानचित्तं ध्येयपदार्थस्य चिन्तने समर्थं भवति। एतदर्थं सम्प्रज्ञातयोगे विषयस्य साक्षात्कारात्मको वृत्तिनिरोधः, चित्तस्य एकाग्रतावस्थातः प्रारभ्यते। अमुष्मिन् काले पदार्थस्य संशय–विपर्यय–शून्य–यथार्थ–ज्ञानं भूयते। अर्थात् तस्मिन्नेवकाले स्थूलपदार्थाणामवबोधः जायते।

ध्यानस्य क्रमिकोत्कर्षेण चित्तम् अतीन्द्रियपदार्थाणां साक्षात्काराय अपि समर्थं भवति। इत्थं सम्प्रज्ञातयोगे विषयसाक्षात्कारस्य क्रमः स्थूलतः सूक्ष्म प्रति वरीवर्द्धते। अमुष्मिन् श्रुतिवाक्यं प्रमाणम् अस्ति। ''योगारम्भे मूर्तहरिममूर्तमथ चिन्तयेत्। स्थूले विनिर्जितं चित्तं ततः सूक्ष्मे शनैर्नयेत्।।'' पातञ्जलसूत्रनुसारं योगस्य सर्वैः व्याख्याकारैः सम्प्रज्ञातस्य चतुर्धावस्थाः स्वीकृताः। 'वितर्कविचारानन्दास्मितारुपानुगमात्–संप्रज्ञातः।'

असम्प्रज्ञातयोगः– अयं योगः साधनाक्रमस्य दृष्टया आपाततः प्रतीतो भवति यत् सम्प्रजातयोगः असम्प्रज्ञातयोगस्य साक्षात् साधनः परं स्थितिः एवं नास्ति। वस्तुतः सम्प्रज्ञातः सबीजात्मको योगोऽ्स्ति परं असम्प्रज्ञातो निर्बीजात्मको योगोऽस्ति। उभयोर्योगर्योमध्ये असमानता वर्त्तते अतस्मात् सबीजात्मको योगः निर्बीजात्मको योगस्य नास्ति कारणभूतः। यतो हि कार्य–कारणयोर्मध्ये सजातीयता अनिवार्यरूपेण अपेक्षते। परवैराग्यम् एव असम्प्रज्ञातयोगस्य साक्षात् साधनः।

ष्परावैराग्याख्य एवासंप्रज्ञातेन साधनतयाऽऽलम्बनीक्रियत आश्रीयतेत्र्ञ स यतो निर्वस्तुकः'' निर्वस्तुक–ज्ञानप्रसादात्मकपरवैराग्यम् असम्प्रज्ञातयोगस्य साक्षात् साधनः भवितुमर्हति। परवैराग्यस्योद्भवः तदानीमेव भवति यदा साधकः सम्प्रज्ञातस्य अन्तिमास्मितानुगतावस्थायां बुद्धः, एवञ्च पुरुषस्य वास्तविकस्वरूपस्य भेदज्ञानं प्राप्नोति तदनन्तरं बुद्धिं प्रति एवञ्च बुद्धेः कार्य विवेकख्याति प्रत्यपि च हेयत्व–बुद्धिः जागृता भवति। तदनन्तरं सर्ववृत्तिनिरोधात्मकमस्म्प्रज्ञातोऽ्पि सिद्धो भवति। एवमेव परावैराग्योद्भवस्य साधनभूतः सम्प्रज्ञातयोगः परम्परया असम्प्रज्ञातयोगस्य हेतुः भवितुमर्हति। यथा–ज्योतिष्टोम यागः ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' स्वर्गप्राप्तेः साक्षात् साधनः नास्ति अपितु स्वजनदृष्टया परम्परया कारणम्।

सम्प्रज्ञातयोगे एकाग्रचित्तेः सात्त्विक–अक्लिष्टात्मक–ध्येयाकारवृत्तिः अवशिष्टा तिष्ठति। असम्प्रज्ञातयोगे इयमपि निरुद्धा भवति। परिणामतो निवृत्तिकचित्तं संस्कारशेषावस्थायां तिष्ठति। वृत्तिना संस्कारः संस्कारेण च वृत्तिर्भवति। चित्तवृत्तिनिरोधेण तज्जन्य–संस्काराणां निरोधो न भवति। यतो हि वृत्तयः संस्कारणामुपादानकारणं नास्ति अपितु निमित्तकारणम् एव। संस्काराणाम् उपादानकारणमस्ति–''चित्तम्''। एतदर्थम् असम्प्रज्ञातयोगस्य प्रारम्भिकावस्थायां ध्येयाकारवृत्तेः नष्टेऽपि तज्जन्य–संस्कारणाम् उपादानकारणभूतचित्तस्य उपस्थितिना वृत्तिजन्य–संस्कारस्य–स्थितेः सम्भावना उत्पद्यते।

परं निरोधपरम्पराजन्यः दृढतरनिरोधसंस्कारेण चरमासम्प्रज्ञाते प्रज्ञाकृतसंस्कारणामपि पूर्णरूपेण आविर्भावो भवति। फलतः निर्बीजात्मकदुःऽस्य कारणेन संस्कारादिरहितो योगः पूर्णतया सिद्धो भवति। निरोधसंस्कारस्य अभिभवे साधकस्य प्रयासो अनपेक्षते। यथा इन्धनस्य दहनान्तरं पावको स्वतः विरमति। तथैव पुरुषस्य भोगपुरस्सरं मोक्षसंपादनार्थं तत्–तत् पुरुषेण साकं सम्बद्धं पृथक्–पृथक् चित्तं स्वोद्देश्य पूरयित्वा निरोधात्मक–संस्कारेण साकं स्वमूलकारणप्रकृतौ स्वतो लीनं भवति। एतादृशनिरोधसंस्कारावस्थ–चित्तस्य निरोधार्थं साधनान्तरस्य आवश्यक्ता न उत्पद्यते। प्रकृतौ लीनः निरोधसंस्कारविशिष्ट चित्तस्य पुनरुद्भवो न भवति यतोहि चित्तस्य पुनरुत्थानस्य कारणभूता अविद्या प्रसंख्यानाग्निना दग्धा जायते।

पातञ्जलयोगसूत्रे 'असम्प्रज्ञातयोगः' 'निर्बीजयोगः' इति नाम्ना स्वीक्रियते। वाचस्पतिमित्रैः निर्बीजस्य लक्षणम् इत्थं कृतम्–''क्लेशसहितः कर्माशयो जात्यायुर्भोगा बीजं तस्मान्निर्गत इति निर्बीजः।''

## संदर्भ


1. श्रीवास्तव, सुरेशचन्द्र, पातंजल–योगदर्शनम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2009.
2. कर्णाटक, विमला, योगसिद्धान्तचन्द्रिका, चौखम्भा संस्कृति सीरीज ऑफिस, वाराणसी, 2000.
3. उपाध्याय, बलदेव, भारतीय दर्शन की रूपरेखा, चौखम्भा ओरियन्टालिया, दिल्ली, 1971.
4. 4) ईश्वरकृष्ण, सांख्यकारिका, नेशनल पब्लिकेशन हाउस, दिल्ली, 1969.
5. A Bibliography of Dictionaries and Encyclopedia, National Library, Calcutta, 1964.
6. Williams, Monier Sanskrit English Dictionary, M.L.B.D.k~ 2005.
7. आप्टे, वामन शिवराम, संस्कृत हिंदी कोश, रचना प्रकाशन, जयपुर, 2006.
8. देव, राधाकान्त, शब्दकल्पद्रूम, एम–एल–बी–डी–, दिल्ली, 1961.